# DEPARTMENT OF SANSKRIT

# UNIVERSITY OF MUMBAI

## M.A. Entrance Examination 2019-2020

**Paper 1: Unseen Translation**

Date: 20/07/2019 Duration: 3 hours

Day: Saturday Marks: 100

प्र.१]माध्यमभाषया अनुवादं कुरुत । (६० गुणाः)

१) परस्परं भावयन्तः जीवन्तः सन्ति मानवाः पशुभिः सह । तेष्वपि पशुषु अश्वाः गजाः गावः च विशिष्टं महत्त्वम् आवहन्ति मानवजीवने । अतः पश्वायुर्वेदस्य तिस्रः मुख्याः शाखाः उपलभ्यन्ते - अश्वायुर्वेदः गजायुर्वेदः गो - आयुर्वेदः चेति । मत्स्यपुराणे गरुडपुराणे च पशुवैद्यकीयाः बहवः सन्दर्भाः समुपलभ्यन्ते । पशुपक्षिणां चिकित्साविषयम् अर्थशास्त्रे वर्णितवान् अस्ति चाणक्यः अपि । सम्राजः अशोकस्य शिलालेखेषु अपि पशुवैद्यकीयशास्त्रस्य प्रमाणानि भूरिशः प्राप्यन्ते । गवाम् अश्वानां वा चिकित्सायां नकुलसहदेवौ परमनिपुणौ आस्ताम् इत्यादयः उल्लेखाः महाभारते सन्ति । मूकाः एते पशवः स्वीयं कष्टं वक्तुं न पारयन्ति । किन्तु ईदृशाणां शास्त्राणां साहाय्येन मानवः तेषां कष्टानि ज्ञातुं निवारयितुं च पारयति यत् तत्तु पूर्वजानां तपस्यायाः फलम् ।

२) मनुष्यः नाम न केवलं दशेन्द्रियसनाथं शरीरम्। तस्य मनः अपि विद्यते यस्य माध्यमेन सुखस्य अनुभूतिः भवति। मनसः अपि स्वस्य सुखदुःखानि सन्ति। रणभूमौ युद्धव्यापारे मग्नः सैनिकः स्वग्रामात् कुटुम्बीयानां पत्रं प्राप्य किंविधं सुखम् अनुभवति? लक्षावधिभाविकाः शीतातपवर्षादीनां क्लेशान् अविगणय्य तीर्थक्षेत्राणि

Scanned with CamScanner

किमर्थं गच्छन्ति किंविधं च सुखं प्राप्नुवन्ति? बालकस्य स्खलतः शब्दान् श्रुत्वा मातुः अन्तःकरणं कथं आनन्दातिशयेन पूर्णं भवति? किम् इदं श्रवणसुखम् इन्द्रियजन्यम् इति वक्तुम् शक्यते? शारीरकसुखात् इदम् मनसः सुखम् उच्चतरम्। मनोव्यापारस्य क्षेत्रं वैशिष्ट्यपूर्णं तथा सम्पूर्णरूपेण अवगमनार्थं दुष्करमेव ।

३) राम - भो लक्ष्मण,पश्य एतत् सृष्टिसौन्दर्यम्। प्राची दिक् स्मितवदनेव भाति। पवनो मन्दं वहति। द्विजकुलेन मंगलं गीयते। बालभास्कर उदेति। बालमृगा इतस्ततो धावन्ति। एतद्वीक्ष्य सीतादेव्याः स्मरणेन पर्याकुलचितोऽस्मि।

लक्ष्मण - सम्प्रति किष्किन्धायाः नृपस्सुग्रीवस्तव सखा जातः। तस्य वानरसेनायाः सहाय्येन सीतादेव्याः अन्वेषणं सुलभमेव।

राम - न जाने कदा स वानरनृपतिः कार्ये प्रवर्तते।

लक्ष्मण - भवद्भिः वानरेन्द्रस्य कार्यं सम्पादितमेव। अतः सः भवतः कार्यात् पराङ्मुखो न भवेत्।

राम - सत्यमेतत्। किन्तु न जाने कदाचित् सोऽस्मिन्कार्ये मन्दोत्साहोऽपि भवेत्।

४) 'शालिहोत्रसंहिता ' इति स्वीये ग्रन्थे आयुर्वेदपद्धत्या अश्वानां चिकित्सां वर्णयति शालिहोत्रः। अयं शालिहोत्रः एव पशुवैद्यकीयशास्त्रस्य जनकः इति प्रसिद्धः। पाणिनिमहर्षेः मूलग्रामे शालातुरे तस्य जन्म अभवत्। तदीयः कालः सा.श.पू. प्रथमे शतके स्यात् इति उच्यते कैश्चित्। किन्तु शालिहोत्रसंहिता महाभारतात् पूर्वमेव लिखिता इति अभिप्रयन्ति केचन। अयं ग्रन्थः अष्टसु विभागेषु विभक्तः। एकैकस्मिन् विभागे केचन विषयाः विस्तृततया चिन्तिताः। अत्र कृतं अश्वानां वर्गीकरणं नामकरणं वा शालिहोत्रस्य सूक्ष्मम् अवलोकनं प्रमाणीकरोति। विभिन्नानि लक्षणानि उपयुज्य अश्वानां ४८ प्रकाराः वर्णिताः सन्ति।

Scanned with CamScanner

प्र.२] माध्यमभाषया अनुवादं कुरुत ।

१) तैलात् रक्षेत् जलात् रक्षेत्, रक्षेत् शिथिलबन्धनात् (१० गुणाः)
मूर्खहस्ते न दातव्यम् एवं वदति पुस्तकम् ॥
हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम्
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ॥
भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती
तस्यां हि काव्यं मधुरं तस्मादपि सुभाषितम् ॥
उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥

२) आकाशात् पतितं तोयं यथा गच्छति सागरम् (१० गुणाः)
सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥
शतेषु जायते शूरः सहस्रेषु च पण्डितः
वक्ता दशसहस्रेषु दाता भवति वा न वा ॥
काकः कृष्णः पिकः कृष्णः को भेदो पिककाकयोः
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ॥
लालयेत् पञ्चवर्षाणि दशवर्षाणि ताडयेत्
प्राप्ते तु षोडशे वर्षे पुत्रे मित्रवदाचरेत् ॥

Scanned with CamScanner

३) ज्ञानं प्रधानं न तु कर्महीनं कर्म प्रधानं न तु बुद्धिहीनं (१०

गुणाः)

तस्मात् द्वयोरेव भवेत्सुसिद्धैर्नह्येकपक्षो विहगो प्रयाति ॥

पिबन्ति नद्यः स्वयमेव नाम्भं, स्वयं न खादन्ति फलानि वृक्षाः

नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ॥

४) काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् (१० गुणाः)

व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ॥

परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः

परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम् ॥

---

Scanned with CamScanner

# DEPARTMENT OF SANSKRIT
# UNIVERSITY OF MUMBAI

## M.A. Entrance Examination 2019-2020

## Paper II : History of Classical Sanskrit Literature

Date : 20th July, 2019 Duration : 3 hours

Day : Saturday Marks : 100

**Q.1. Write exhaustive notes (any two) 40 marks**

1) Kadambari of Banabhatta
2) Naishadhiyacaritam
3) Didactic Literature in Sanskrit

**Q.2. Write critical notes on the following (Any four) 60 marks**

1) Prose literature in Sanskrit
2) Critical appreciation of Mrucchakatikam
3) Shatakatraya of Bhartrhari
4) Kumarsambhavam of Kalidas
5) Critical appreication of any play written by Bhasa

---

Scanned with CamScanner